॥ श्रीः ॥

॥ श्रीगणेशाय नमः ॥

श्रीभास्करीयकरणकुतूहलं

श्रीसुधाकरीयवासनाविभूषणसहितम् ।

वेदेहीप्रियपादपङ्कजं कमनीयं कमलालिलालितम् ।
मनसि निधाय वदामि वासनां वरभास्करकृतखेटकर्मणः ॥

तत्र निर्विघ्नार्थं मङ्गलं ततः खेटकर्म्म प्रवक्ष्यामीति ब्रवीति श्रीभास्करः ।

गणेशं गिरं पद्मजन्माच्युतेशान्
यक्षान् भास्करो भास्करादींश्च नत्वा ।
लघुप्रक्रियं प्रस्फुटं खेटकर्म्म
प्रवक्ष्याम्यथ ब्रह्मसिद्धान्ततुल्यम् ॥ १ ॥

स्पष्टार्थम् ।

अथ वृत्तद्वयेनाहर्गणं साधयति ।

शकः पञ्चदिक्चन्द्र ११०५ हीनोऽर्कनिघ्नो-
मधोयातमासान्वितोऽधो द्विनिघ्नात् ।
रसाङ्गान्वितात्स्वाभ्रषाङ्कांशहीनात्
शराङ्गैरवाप्ताधिमासैर्युगघ्नैः ॥ २ ॥
खरामाहतो यातनित्यन्वितोऽध-
स्त्रियुक्तात्स्वरामाग्निशैलांशयुक्तात् ।
युगाङ्गैरवाप्तावमोनस्तदूर्ध्वो-
भवेज्जीववाराद्विकोऽहर्गणोऽयम् ॥ ३ ॥

स्पष्टार्थमेतत् ।

अथोपपत्तिः । पञ्चशून्येशशक्रो यन्यारम्भकालिकः शकस्तेनेनेष्टशके यन्यारम्भात्समागणो जातः । ततो मासीकरणं सुगमम् ।

ततः कलेर्गताब्दा रविभिर्विनिघ्ना इत्यादिनाऽधिमासानयनं स्पष्टं अथ यन्यारम्भे कल्पगतवर्षगणः = १९७२९४८२८४ अतो द्विधाब्दा द्विरामै खरामैश्च भक्ता इत्यादिना अधिमासशेषं. मासात्मकं $\frac{३}{६०}$ यन्यारम्भे स्पष्ट मानेनाधिमासो न पतति तेन धास्तवाधिशेषमानं मासात्मकम् १ + येनाङ्केन पञ्चषष्टिगुणेन स्वनागाङ्कगजांशहीनेन सममिदं स्यात्सोऽङ्क विलोमेन षट्पष्टिर्जातः अत उपपन्नमधिमासानयनं यथोक्तम् । अत्राधि मासानयने नागाङ्कगजस्थाने शतनवकं गृहीतं स्वल्पान्तरात् । अथानुपातेन, एतासु ७०३ × ६४ तिथिषु चयाहाः ७०४ एते भवन्ति तत इष्ट तिथिसम्बन्धिचयाहमानम् $\frac{इति \times ७०४}{७०३ \times ६४}$ अनेन चयाहानयनमुपपन्नम् अथ स्वपञ्चांशहीनाब्दखाङ्केन्दुभाग इत्यादिना त्रिंशद्धीनोत्यवयशेषरहित धास्तवक्षयशेषं $\frac{३}{६०}$ अत्रापि पूर्ववदेव तिथिसंस्कारयोग्या राश्या विलोमविधिना चिमिताऽऽनीतेति शेषं चाति सरलमिति ।

अथ क्षेपकानाह ।

दिशो १० गोयमा २६ विश्व १३ तुल्याः खOमर्के
विधो खेन्दवो१०ङ्काश्विनः २६ पञ्च ५ खाब्धाः ५० ।
विधूच्चेऽब्धयो ४ चेन्दवो१५र्का १२ नवाब्धाः ५६
नवाहत्यष्टि १० तत्त्वा २५ यहाहश्चेन्दुपाते ॥ ४ ॥
कुजेऽश्वाः ७ कुदस्रा २१ जिनाः २४ क्षवि २१ तुल्या
बुधे द्वौ २ कुनेचाणि २१ शक्राः १४ खरामाः ३० ।
गुरौ क्षेपको द्वौ २ कृताः ४ खं ० कुबाणाः ५१
सितेऽष्टौ ८ धृति१८मार्गणाः ५ पञ्चबाणाः ५५ ॥ ५ ॥
युगाऽन्यभनयऽस्त्यब्धयः ४३ शैलचन्द्राः १०
शनौ चेति राश्यादिना क्षेपकेण ।
द्युपिण्डोत्थखेटो युतः स्वेन मध्यो-
भवेदुद्गमेऽर्कस्य लङ्कानगर्याम् ॥ ६ ॥

स्पष्टार्थमेतत् । ६. ८ (१)

अत्रोपपत्तिर्यन्त्रारम्भकालिकयहाणां खाभ्रखार्कैर्हृतगः कल्पजाताः खाभ्रा इत्यादिना धीजकर्म्मसंस्कृतानां क्षेपसंज्ञाः कृता इत्यतिसुगमा ।

अथाहर्गणाद्ग्रहसाधनान्याह ।

अहर्गणो विश्वगुणस्त्रिखाङ्कै-
र्भक्तः फलोनो द्युगणो लवाद्याः ।
रविक्षशुक्राः स्युरथाब्दवृन्दा-
द्वेदाग्नलब्धेन कलादिहीनाः ॥ ७ ॥
अन्हां गणः शक्रगुणो विहीनः
स्वात्यष्टिभागेन लवादिरिन्दुः ।
अहर्गणात्खाभ्ररसाग्निभक्ता-
दाप्तेन भागादिफलेन हीनः ॥ ८ ॥
गणो द्विधा गोभिरिनाभ्रवेदै-
र्लब्धेक्यमंशादि भवेद्विधूच्चम् ।
द्विधाङ्कचन्द्रैः खखभेदिनघ्ना-
दाप्तांशयोगो भवतीन्दुपातः ॥ ९ ॥
रुद्रघ्नो द्युचयो द्विधा शशियमैर्वेदाब्धिसिद्धैर्भवे-
र्भक्तोंऽशादिफलद्वयं च सहितं स्यान्मेदिनीनन्दनः ।
वेदघ्नो द्युगणः स्वकीयदहनाव्यंशेन युक्तो भवे-
द्भागादि त्वचलं गणात्त्रिहतियमेन्द्वप्तांशकैर्वर्जितम् ॥ १० ॥
गणो द्विधार्कैर्भयमाब्धिभिश्च भक्तः फलांशान्तरमिन्द्वमन्त्री ।
नृपाहतोऽन्हां निचयो द्विधाऽसौ भूबाणवेदादिभिरभ्रचन्द्रैः ॥११॥
भक्तो लवाद्यं फलयोर्यदैक्यं तज्जायते दैत्यगुरोश्चलोच्चम् ।
भक्तः खरामैस्तुरगाङ्गरामनन्दैर्द्विधांशादिफलैक्यमार्किः ॥ १२ ॥

स्पष्टार्थम् ।

अत्रोपपत्तिः । दिनगतिरहर्गणगुणिता तद्भागा दिनगणोत्पन्ना यहा-र्यणादिकाः स्युः । तत्रावाप्येण दिनगतेः खण्डं कृत्वा खण्डं गुणहराः सा-

धिता यथार्कस्य दिनगतिभोगादिका

$\frac{\text{फरभ} \times १२ \times ३०}{\text{क कु}} = \frac{४३२०००००० \times १२ \times ३०}{१५७९१९४५०००} = \frac{३८४०००}{३८९६०९}$ अस्य सविस्तार-

रूपम् $= \cfrac{१}{१ + \cfrac{१}{६८ + \cfrac{१}{२ + \cfrac{१}{५ + \cfrac{१}{१ + \cfrac{१}{४२ + \cfrac{१}{३ + \frac{१}{३}}}}}}}}$

ततोऽस्मादासन्नमानानि $\frac{१}{१}, \frac{६८}{६९}, \frac{१३७}{१३९}, \frac{७५३}{७६४}, \frac{८९०}{९०३}$ इत्यादि अत्राचार्येणेदं $\frac{८९०}{९०३}$ मासन्नमानं गृहीतं ततोऽस्य स्वरूपान्तरं कृतं तद्यथा $\frac{८९०}{९०३} = \frac{९०३}{९०३} - \frac{१३}{९०३} = १ - \frac{१३}{९०३}$ इयमेव भागात्मिका गतिर्दिनगणगुणा जाता लवादिको रविः $= अ - \frac{१३ अ}{९०३}$ अस्मादेकस्मिन्सौरवर्षे ३६५ । १५ । ३० । २२ । ३० दिनाद्यहर्गणे रविः = ३६० । ० । ० । २ । १५ तत्र घास्तघरविः = ३६० अनयोरन्तरं = ० । ० । ० । २ । १५

$= \frac{९ क}{४ \times ६० \times ६०} = \frac{१}{१६००}$ तथा खाभ्रखार्कैर्हृताः कल्पजाताः समा इत्यादि-

ना कगव = १९७२९४७१७९ + ११०५ + शे = १९७२९४८२८४ + शे तत्रणेन जाता = ४२८४ + शे अत्र व्यक्तखण्डोत्थफलं क्षेपमध्ये पूर्वमेव संस्कृतं शेषसम्बन्धि-

फलं $= \frac{३ शे}{२००}$ इदमेव फलमेकस्मिन्वर्षे जातं कलादिकम् $= \frac{३}{२००}$ पूर्वानीतान्त-

रसंस्कारेण जातमेकस्मिन्वर्षे शोधनफलं $= \frac{३}{२००} + \frac{१}{१६००} = \frac{२५}{१६००} = \frac{१}{६४}$ अनु-

पातेनाभीष्टवर्षे जातं $= \frac{अ य}{६४}$ अत उपपन्नं सर्वम् ।

यथानन्तरानीतशेषमानं ४२८४ + शे = ६००० यावत्तावदेवाचार्यो-क्त विधिना निरन्तरो रविरन्यथा सान्तर एव इति धीमद्भिर्बोध्यं तदन्तरं तु १६ एतदुपगणानन्तरं गन्यारम्भाद्विष्यतीति सर्वं निरवद्यम् । एवं सर्वेषां या हाणामानयनप्रकाराणामासन्नमानादिना स्वधिया सुधिया वासना विधे-येा अलं पल्लवितेन ।

इदानीं ग्रहाणां दिनगतीराह ।

नन्दाद्रा भुजगा रवेः शशिगतिः खाङ्काद्रयोऽङ्गाग्नयः
गुह्यस्याङ्ककलाः कुवेदविकलाः पातस्य रामा भवाः ।
माहेयस्य महीगुणा रसकरा ज्ञस्येषुसिद्धा रदाः
पञ्चज्यस्य सितस्य षण्णवमिता अष्टौ शनेर्द्वे कले ॥ १३ ॥

स्पष्टार्थे वासना चाति सुगमा ।

इदानीं रेखापुराणि देशान्तरं चाह

पुरी रत्नसं देवकन्याद्य काञ्ची सितः पर्वतः पर्यलीवत्सगुल्मौ ।
पुरी चोज्जयिन्याह्वया गर्गराटं कुरुक्षेत्रमेरू भुवौ मध्यरेखा ॥ १४ ॥
रेखास्वदेशान्तरयोजनघ्नी गतिर्यहस्याभ्रगजैर्विभक्ता ।
लब्धा विलिप्ताः खचरे विधेयाः प्राच्यामृणं पश्चिमतो धनं ताः ॥ १५ ॥

पूर्वोक्तं चातिसुगमं द्वितीये त्वनुपातः स्पष्टभूपरिधियोजनैर्गतिवि-कलास्तदा देशान्तरयोजनैः किं तत्राचार्येण स्पष्टभूपरिधिः अष्टचत्वारिं-शच्छतगुणो गृहीतस्ततो जातं विकलादिकं देशान्तरसम्बन्धिफलं

$$\frac{\text{गक} \times ६० \times \text{देयो}}{४८००} = \frac{\text{गक} \times \text{देयो}}{८०}$$ अत उपपन्नं यथोक्तम् ।

इदानीं ग्रहाणां बीजकर्माह ।

अब्धा गजाश्वेस्त्ररसैर्विभक्ता ऋणं विलिप्तासु शशीज्ययोः क्रमात् ।
विश्वेः खरामैर्द्र्यमेश्च खेचरैः पातोऽसृसौम्यास्फुजितां धनं तथा ॥ १६ ॥

स्पष्टार्थमिदमुपपत्तिश्च एकरविवर्षे खाश्वखार्कैर्हृता इत्यादिनानीतेन विकलात्मकफलेन दिनगणोत्थावास्तवावास्तवग्रहान्तरसंस्कृतेन स्फुटा यथा चन्द्रस्य संस्कृत्यविकलात्मकबीजकर्मज्ञानार्थं प्रथमं दिनगतिर्भोगां-

शिका = $\frac{१४०००८०}{१०६२५७}$

अस्य विततमानं = १३ + $\cfrac{१}{५ + \cfrac{१}{१ + \cfrac{१}{२ + \cfrac{१}{२९ + \cfrac{१}{१ + \cfrac{१}{२ + \cfrac{१}{३ + \cfrac{१}{३ + \cfrac{१}{६}}}}}}}}}}$

अस्मादासन्नमानानि = $\frac{१३}{१}, \frac{६६}{५}, \frac{७९}{६}, \frac{२२४}{१७}$ इत्यादि दिनगणोत्थयहानयने तत्राचार्येणेदं गृहीतं $\frac{२२४}{१७}$ अस्य स्वरूपान्तरं $\frac{२२४}{१७} = १४ - \frac{१४}{१७}$ अस्य वास्तवेन सहान्तरं कृत्वा स्वल्पान्तरादितीयखण्डं $\frac{१}{८६००}$ एतन्मितं गृहीतं तत एकस्मिन् रविवर्षे निर्णीतानयनात् साधितो विधुभगणाद्याः = १३ । ४ । १२ । ४६ । २८ । ३० । ११६ । २० । वास्तवचन्द्रो भगणाद्याः = $\frac{५०७५३३०००००}{४३२०००००००}$

= $\frac{१९२५११}{१४४००}$ = १३ । ४ । १२ । ४६ । ३० । ० । ० । ० । अनयोरन्तरं विकलादिकं धनं = १ । २९ । १३ । ४० तथा चैकस्मिन्वर्षे विकलादिकमृणं बीजकर्म्मे = १ । ३० अनयोरन्तरमृणं = ० । ० । ४६ । २० = $\frac{१३९}{३ \times ६० \times ६०} = \frac{१}{२८}$ एकवर्षे त्रिंशद्वर्षे त्विदं $\frac{अव}{८८}$ अत उपपन्नं चन्द्रस्य बीजकर्म्म । एवं सर्वेषां ज्ञेयमिति ।

इदानीं मध्यमाधिकारस्योपसंहारमाह ।

इतीह भास्करोदिते यहागमे कुतूहले ।
विदग्धबुद्धिवल्लभे नभोगमध्यसाधनम् ॥ १० ॥

स्पष्टम् ।

श्रीकृपानुतनयेन निर्मिते वासनावरविभूषणे वरा
खेटमध्यगणितस्य वासना सूक्तियुक्तिसहिताऽत्र सङ्गता ।

इति करणकुतूहलवासनाविभूषणे मध्यमाधिकारः

अथ स्पष्टाधिकारस्तत्र ग्रहाणां मन्दोच्चान्याह ।

मन्दोच्चमर्कस्य गजाद्रिभागा भौमादिकानां सदलाष्टसूर्याः ।
सत्र्याश्विनः सार्द्धयमाद्रिचन्द्राः क्रमेण मतङ्गाग्नियमाः क्रमेण ॥ १ ॥

स्पष्टार्थे । मन्दोच्चानां स्थिरत्वात्स्वकाल एव आचार्येण प्रसाध्य पठितानि तानीति स्फुटैव वासना ।

इदानीं भौमादिकानां शीघ्रान्त्यफलज्याः शीघ्रोच्चादीनि च लिखति ।

कुकुञ्जरा वेदकृताब्धिदस्राः सप्ताहयो विश्वमिताः पराख्याः ।
भौमादिकानामथ मध्यमोऽर्कः शीघ्रोच्चमीज्यारशनैश्चराणाम् ॥ २ ॥
ग्रहोनमुच्चं मृदु चञ्चलं च केन्द्रे भवेतां मृदुचञ्चलाख्ये ।
त्रिभिस्त्रिभिर्भैः पदमत्र कल्प्यं स्वर्णं फलं मेषतुलादिकेन्द्रे ॥ ३ ॥
ऊनं भुजः स्यात्त्र्यधिकेन हीनं भार्द्धं च भार्द्धादधिकं विभार्द्धम् ।
नवाधिकेनोनितमर्कभं च भवेच्च कोटिस्त्रिगृहं भुजोनम् ॥ ४ ॥
भौमाशुकेन्द्रे पदयातगम्यस्वल्पस्य लिप्ताः खखवेदभक्ताः ।
लब्धांशकैः कर्किमृगादिकेन्द्रे हीनान्वितं स्पष्टमसृङ्मृदूच्चम् ॥ ५ ॥
लब्धांशकानां त्रिलवेन हीनः स्पष्टः परः स्यात्त्रितनन्दनस्य ।

स्पष्टम् ।

अत्रोपपत्तिः । भौमादिकानां परमशीघ्रफलानां खार्कमिते व्यासार्द्धे क्षीवा चाकलय्य ता एव परसंज्ञाः पठिता इति सुगमा । अथ भौमाशुकेन्द्रपदगम्यगतास्वज्जीवा त्र्यंशोनशैलगुणिताऽर्द्धयुतस्य राशेर्भाव्योद्धृतेत्यादिना भौमस्य मन्दोच्चसम्बन्धिसंस्कारमानं $= \frac{२० \times त्रं \times २}{८५ \times ३} = \frac{२० \times त्रं \times ६० \times २}{८५ \times ३ \times ६०}$

$= \frac{२० \times २ \times त्रंक}{८५ \times ३ \times ६०} = \frac{२ \times त्रंक}{८५ \times ३ \times ३} = \frac{२ त्रंक}{७६५} = \frac{त्रंक}{३८३}$ वा, $\frac{त्रंक}{५००}$ स्वल्पान्तरात्

वा। उपपन्नं मूलोक्तं तथा लब्धांशकैर्विरहितः परिधिरित्यादिना वास्तवप-

रिधिः = प्रापरि − भं ततोऽनुपातेन परमानं = $\frac{१२° \ (\text{प्रापरि} - \text{भं})}{३६०}$

$= \frac{\text{प्रापरि}}{३} - \frac{\text{भं}}{३} = \text{पूप} - \frac{\text{भं}}{३}$ अत उपपन्नं सर्वं यथोक्तमिति ।

इदानीं ज्याखण्डकानि लघुज्यादिसाधनं चाह ।

रूपाश्विनो विंशतिरङ्कचन्द्रा अत्यष्टितिथ्यर्कनवेषुदस्राः ॥ ६ ॥
ज्याखण्डकान्यंशमितेर्दशाप्तं स्युर्भुक्तखण्डान्यथ भोग्यनिघ्नाः ।

शेषांशकाः खेन्दुहृता यदाप्तं तद्भुक्तखण्डैक्ययुतं भवेज्ज्या ॥ ७ ॥

विशोध्य खण्डानि दशघ्नशेषादशुद्धलब्धं धनुरंशकाद्यम् ।
विशुद्धसंख्याहृतदिग्युतं स्याद्यास्तैर्दलैर्व्यस्तधनुर्ज्यके स्तः ॥ ८ ॥

स्पष्टार्थमुपपत्तिश्च सरला ।

इदानीं ग्रहाणां मन्दफलसाधनान्याह ।

सूर्यादिकानां मृदुकेन्द्रदोर्ज्या दिग्घ्नी विभाज्याथ कुपञ्चबाणैः
नागाग्निदस्रैर्गिरिपूर्णचन्द्रैर्वेस्वङ्कभूमिर्वसुनेत्रनेत्रैः ॥ ९ ॥

युगाष्टशैलैर्मुनिपञ्चचन्द्रैः फलं लवाः केन्द्रवशाद्धनर्णम् ।
कार्यं ग्रहे सूर्यविधू स्फुटौ स्तो मन्दस्फुटाख्या इतरे स्युरेवम् ॥ १० ॥

स्पष्टार्थमिदम् ।

अत्रोपपत्तिः । सिद्धान्तविधिना परममन्दफलान्यानीय ततोऽनुपातः कृतस्तद्यथा रवेः, यदि खार्कमितया दोर्ज्यया परमफलं भागादिकं लभ्यते तदाऽभीष्टया किं जातं लब्धादिकं रवेर्मन्दफलं

$\frac{\text{दो} \times १३°}{१२° \times ६°} = \frac{\text{दो} \times १°}{५५४}$ अत्र मन्दफलं $\frac{१३°}{६°}$ अस्मात् किंचिदधिकमस्त्यतो हरे ह्राद्यस्थाने रूपं कृतं तस्माद्बुराद्धास्तवासन्नमेव फलमित्येवं सर्वेषामुपपत्तिर्ज्ञेया दोर्ज्यागुणकस्य दशांशेनापवर्त्तनं विधायेति शेषं स्फुटमेव ।

इदानीं चन्द्रे भुजान्तरफलं ग्रहाणां गतिफलानि चाह ।

भानोः फलं भैर्विहृतं च चन्द्रे, मध्ये विधेयं रविवद्धनर्णम् ।
स्वभोग्यखण्डं नवहृत्खरांशोर्विश्वाहतं वेदहृतं हिमांशोः ॥ ११ ॥

द्विघ्नं नगाप्तं कुजसोम्ययोश्च खाब्धिघ्नेः खार्कमितैश्च भक्तम् ।
जीवादिकानां च गतेः फलं तत्स्वर्णं क्रमात्कर्किमृगादिकेन्द्रू ॥ १२ ॥

अत्रोपपत्तिः ।

यदि त्रिंशदंशैर्निरक्षोदयो लभ्यते तदा रविफलांशैः किं पुनर्यदि त्रिंशच्छतपानीयपलैश्चन्द्रगतिर्भागात्मिका तदा पूर्वानीतपलैः किं लब्धं कारमानमंशात्मकं तद्रूपं च यथा $\frac{\text{निउ} \times \text{रफ} \times \text{चगक}}{३० \times ३६०० \times ६०}$ अत्र मध्यममानेन सर्वेषोपयोगित्वात् निरक्षोदयमानं पलात्मकं त्रिंशच्छतसमं गृहीतं तथा चन्द्रगतिः कलात्मिका स्वल्पान्तरादष्टशतसमा ततः संस्कारस्य स्वरूपानां $= \frac{३०० \times ८०० \times \text{रफ}}{३० \times ३६०० \times ६०} = \frac{८ \times \text{रफ}}{३६ \times ६} = \frac{\text{रफ}}{२७}$ अत उपपन्नं प्रथमश्लोकार्द्धं । अथ गतिफलानयने त्वनुपातः यदि दशभिरंशैर्भोग्यखण्डं लभ्यते तदा मृदुकेन्द्रभागादिकया किं लब्धमद्यतनस्वस्तनकेन्द्रज्ययोरन्तरं ततो यन्मन्दफलं तदेव गतिफलं यथा रवेः गफ $= \frac{\text{भोख} \times ६० \times १० \times ६०}{१० \times ६० \times ५५१} = \frac{\text{भोख}}{९}$

सर्वमुपपत्तिसंज्ञेयेति सर्वं निरवद्यमिति ।

इदानीं भौमादीनां कर्णानयनं शीघ्रफलानयनं चाह ।

कोटिज्या चलकेन्द्रजा परगुणा द्विघ्नी तयोनान्विता
केन्द्रे कर्किमृगादिके परकृतिः खाभ्राब्धिशक्रैर्युता ।
तन्मूलं त्रयणः परेण गुणिता दोर्ज्याय कर्णाद्भुता
तद्वापे चपलं फले धनमृणं मन्दस्फुटे स्यात्स्फुटः ॥ १३ ॥

मूलाद्यशेषकं सैकं षष्ट्या विकलान्वितम् ।
द्विसप्तद्वियुक्तेन मूलेनाप्तं स्फुटं भवेत् ॥ १४ ॥

तदुत्थमान्देन चलेन मध्यश्चेत्संस्कृतः स्पष्टतरस्तदा स्यात् ।
दलीकृताभ्यां प्रथमं फलाभ्यां ततोऽखिलाभ्यामसकृत्फलं तु ॥ १५ ॥

स्पष्टार्थं । खार्कमितां त्रिज्यां प्रकल्प्य स्वकोटिज्यावान्त्यफलज्ययोश्च योगे मृगादावथ कर्कटादावित्यादिना कर्णाद्यानयनोपपत्तिः स्फुटा । अथ

• इदं शेषकमुपपत्तिसंज्ञेयेत्यन्तं मूल एव लिखितमस्माभिः ।

मूलावशेषकं सैकं षष्टिघ्नमित्यस्योपपत्तिः। कल्प्यते अर्धगोऽङ्कः = अ अस्य निर-
यगूलं = मू वास्तवमूलं = या + मू ततः (या + मू)^२ = अ
वा, या^{२} + २ यामू + मू^{२} = अ
अथ वा, या^{२} + २ या मू = शे ततः २ या^{२} + २ या · मू = या^{२} + शे ततः
$या = \frac{या^२ + शे}{२ या + २ मू}$ अत्र यास्थाने स्वल्पान्तराद्रूपस्योत्थापने कृते जातं
$या = \frac{१ + शे}{२ + २ मू}$ अधोऽवयवार्धे षष्टिगुणितमित्युपपन्नम्।

इदानीं भौमादीनां स्फुटगतिमाह।

द्राक्केन्द्रभुक्तिर्गुणिताशुचापभोग्यज्यया खाब्धिगुणा च भक्ता।
सप्रघ्नकर्णेन चलोच्चभुक्तेः शोध्यावशेषं स्फुटखेटभुक्तिः॥ १६॥
यदा न शुद्धा विपरीतशोध्या शेषं भवेद्वक्रगतिस्तदानीम्।
अत्र आशुचापेन शीघ्रफलं ज्ञेयमन्यत्स्पष्टार्थम्।

अत्रोपपत्तिः। यदि दशभिरंशैर्भोग्यखण्डं तदा शीघ्रकेन्द्रगत्या किं लब्धं शीघ्रफलस्य शीघ्रकेन्द्राधिकफलस्य च ज्ययोरन्तरं ततः कर्णाग्रे पूर्वल-
समम्नन्तरं तदा त्रिज्याग्रे किं पुनश्चापार्धं प्रथमज्याखण्डेन दशांशास्तदाधुना-
नीतेन किं जाता स्पष्टा केन्द्रगतिः तत्कलारूपं = $\frac{\text{भोख} \times \text{केग} \times १२० \times १० \times ६०}{१० \times \text{शीक} \times २१ \times ६०}$
= $\frac{\text{भोख} \times \text{केग} \times ४०}{७ \times \text{शीक}}$ अत उपपन्नं यथोक्तं फलांशखाङ्कान्तरशिञ्जिनीघ्न्या...
उपपत्तौ यत्क्षेत्रं तदेवात्रापि बोध्यम्। शेषोपपत्तिश्चातिस्फुटा।

इदानीमुदयान्तरमाह।

अयनांशाः करणाब्दलिप्तायुक्ता भवास्तद्युतमध्यभानोः॥ १७॥
द्विघ्नस्य दोर्ज्या शरहृद्विलिप्ता भानोर्विधोः क्वचिद्धृताः कलास्ताः।
स्वर्णे [illegible]मोजपदे स्थितेऽर्के क्रमेण कर्मेत्युदयान्तराख्यम्॥ १८॥

करणात् करणवर्षारम्भाब्दे अब्दास्तत्समा लिप्ता इति करणाब्द-
लिप्ताः शेषं स्पष्टार्थम्।

अत्रोपपत्तिः। वर्षारम्भे स्वल्पत्वमिता अयनांशा आसन् प्रतिवर्षं चैककला गतिश्च स्वल्पान्तरात्तत उपपन्नमयनांशानयनम्। अथ मध्याह्ने

स्वःभागयुताद्विनिघ्नाद्दोर्ज्या लघुर्गतिगुणा खनगाश्विभक्ता इत्यादिनोदया-
स्तारकर्म्मानीतं तद्यथा रवेः $\frac{\text{दोर्ज्या} \times ६०}{३००} = \frac{\text{दोर्ज्या}}{५}$ एवं चन्द्रस्य कलादिकं
फलं $= \frac{\text{दोर्ज्या} \times ७९०}{२७० \times ६०} = \frac{\text{दोर्ज्या}}{२१}$ अन्येषां ग्रहाणां स्वल्पान्तरात्रोक्तं गतेरल्प-
त्वादिति ।

इदानीं पलभादीन्याह ।

अयनलग्नदिनेः प्राङ्मेषसंक्रान्तिकाला-
द्युघटि द्विघ्नमध्ये या प्रभाऽल्पप्रभा सा ।
दशगजदशनिघ्नी सावभान्त्या विभक्ता
पलभगृहचरखण्डान्यायनांशाढ्यभानोः ॥ १९ ॥
भुजगृहमितयोगो भोग्यखण्डांशघाता-
त्स्वगुणलवयुगस्वं स्वं चरं गोलयोः स्यात् ।
चरपलगतिघातः षष्टिभक्तो विलिप्ताः
स्वगुणमुदयकाले व्यस्तमस्तग्रहेषु ॥ २० ॥
विरविचन्द्रलवा रविषड्हृताः पृथगितास्तिथयः करणानि च ।
कुरहितानि यदाच्छकुनप्रभृत्यसितभूतदलादिचतुष्टयम् ॥ २१ ॥
यदकलाः सरवीन्दुकला हृताः खखगजैश्च भयोगमितौ क्रमात् ।
अथ हृताः स्वगतेष्यविलिप्रिकाः स्वगतिभिश्च गतागतनाडिकाः ॥२२॥
इतीह भास्करोदिते यहागमे कुतूहले ।
विदग्धबुद्धिवल्लभे नभःसदां स्फुटा गतिः ॥ २३ ॥
स्पष्टार्थे सिद्धान्तयुक्त्या वासनापि सर्वेषां प्रकाराणां चातिसुगमा ।
श्रीकृपालुदत्तनयेन निर्मिते वासनावरविभूषणे वरा ।
स्पष्टपेठगणितस्य वासना मुक्तिर्युक्तिसहिताऽत्र सङ्गता ॥
इति करणकुतूहलवासनाविभूषणे स्पष्टाधिकारः ।

अथ त्रिप्रश्नाधिकारस्तत्रादौ निरक्षोदयादीन्याह ।

लङ्कोदया नागपुरद्रुदग्रा गोदाश्विनो रामरटा विनाड्यः ।
क्रमोत्क्रमस्थाश्चरखण्डकेः स्वैः क्रमोत्क्रमघ्नैश्च विहीनयुक्ताः ॥ १ ॥

मेषादिषड्गणोदयाः स्वदेशे तुलादितोऽमी च षडुत्क्रमस्थाः ।
तात्कालिकोऽर्कोऽयनभागयुक्तस्तद्भाग्यभागैरुदयो हतः स्वः ॥ २ ॥
खाग्न्युद्धृतस्तं रविभाग्यकालं विशोध्येदिष्टघटीपलेभ्यः ।
तदयतो राश्युदयांश्च शेषमशुद्धहृत्खाग्निगुणं लवाद्यम् ॥ ३ ॥
अशुद्धपूर्वैर्भवनैरजाद्यैर्युक्तं तनुः स्यादयनांशहीनम् ।
भोग्याल्पकाले खगुणाहतेऽर्कः स्वीयोदयाप्तांशयुतो विलग्नम् ॥ ४ ॥
अर्कस्य भोग्यस्तनुभुक्तयुक्तो मध्योदयाढ्यः समयो विलग्नात् ।
यदैकभे लग्नरवी तदा तद्भागान्तरघ्नोदयखाग्निभागः ॥ ५ ॥
स्यादिष्टकालो यदि लग्नमूनं शोध्यो द्युरात्रादथ वा रजन्याः ।
रात्रीष्टकाले तु सपञ्चसूर्य्याल्लग्नं ततोऽप्युक्तवदिष्टकालः ॥ ६ ॥
चरपलयुतहीना नाडिकाः पञ्चचन्द्रा
द्यदलमथ निशार्द्धं याम्यगोले विलोमम् ।
द्यदलगतघटीनामन्तरं तन्नतं स्या-
न्नतरहितदिनार्द्धे चोन्नतं जायतेऽत्र ॥ ७ ॥

सिद्धान्तोक्तप्रकारेण वासनार्थौ द्वावपि स्फुटौ ।

इदानीमिष्टछायामाह ।

दिनदलं विशरं खहरो भवेन्नतकृतिः पृथगभ्रशराहता ।
खखनवाढ्यपृथक्स्थितयः हृता खहरतः पतिताभिमतो हरः ॥ ८ ॥
अथ नतं यदि पञ्चदशाधिकं दिनदलात्पतितं स हरस्तदा ।
प्रथमखण्डहृतं दलितं चरं स्वगुणितं स्वषडंशविवर्जितम् ॥ ९ ॥
दशयुतं पलकर्णहतं हृतिर्हरहृता श्रवणोऽङ्गुलपूर्वकः ।
रवियुतोनितकर्णहते पदं द्युतिरिनद्युतिवर्गयुते श्रुतिः ॥ १० ॥

खहरो मध्यहरः प्रथमखण्डं स्वदेशीयचरसम्बन्धि प्रथमखण्डं द्युतिः छाया शेषं स्पष्टार्थम् ।

अत्रोपपत्तिः । दिनदलपञ्चदशघट्यन्तरं चरघट्यस्तत्स्वरूपं उत्तरगोले, घघ = दिद – १५ तदंशाः = ६ दिद – ९० द्विगुणिताः स्वल्पान्तराक्ष्णा खार्कत्रिज्यायां चज्या = १२ दिद – १८० त्रिज्यायां युता जाता ज्या

= १२ दिद – ६० = १२ (दिद – ५), तत्र दिद – ५ अस्य खहारसंज्ञा कृता, एवं दक्षिणगोले चघ = १५ – दिद तदंशाः = ९० – ६ दिद चज्या = १८० – १२ दिद चित्र्यायाः शुद्धा ज्ञातान्त्या = १२ दिद – ६० = १२ (दिद – ५) अत्रापि दिद – ५ = खहा अतः खहरोपपत्तिः स्फुटा । यथान्त्या नतोत्क्रमज्याहीना इष्टान्त्या भवति तत्र ६ नका = नक्रं, नकोक्रं = ९० – ६ न, द्वेःकोटिभागरहिताभिहताः खनागचन्द्रास्तद्वीयचरणोनशरार्कहृताभिः । ते व्यासखण्डगुणिता विहृताः फलं तु ज्याभिर्विनापि भवतो भुजकोटिजीवे ॥ इति श्रीपतिप्रकारेण नज्या = $\frac{(१८० - ६न)६न \times १२०}{१०१२५ - \frac{(१८० - ६न)६न}{४}}$

$= \frac{(१८० - ६न)६न \times ४८०}{४०५०० - (१८० - ६न)६न}$ एवं न कोज्या = $\frac{(९० + ६न)(९० - ६न)४८०}{४०५०० - (९० + ६न)(९० - ६न)}$

$= \frac{(१५ + न)(१५ - न)४८०}{११२५ - (१५ + न)(१५ - न)} = \frac{(२२५ - न^२)४८०}{९०० + न^२} = \frac{१२(९००० - ४०न^२)}{९०० + न^२}$

$१२\left(१० - \frac{५० न^२}{९०० + न^२}\right)$ ततो नतकालस्योत्क्रमज्या = $\frac{५० न^२ \times १२}{९०० + न^२}$

इष्टान्त्या = $१२\left(ख ह - \frac{५० न^२}{९०० + न^२}\right)$ अथ यदि नतं पञ्चदशाधिकं तदा षष्ठ्यंशेन्दुनाप्तोननतात्क्रमज्या त्रिज्यान्विता सैव नतोत्क्रमज्येत्यादिना न उ ज्या = १२० + २ (६ न – ९०) = १२ न – ६०, चज्या = १२ (दिद – १५) = १२ दिद – १८० चन्त्या = १२ दिद – ६० इष्टान्त्या = १२ (दिद – न) उभयत्र द्वादशगुणकस्येष्टहरसंज्ञा कृता ततो ज्ञातमिष्टान्त्यायाः स्वरूपान्तरं = १२ × इह । अथ पलश्रुतिघ्नस्त्रिगुणस्य वर्गे इत्यादिना

इक = $\frac{प क \times १२० \times १२०}{द्यु \times १२ \times इह} = \frac{प क \times १२००}{द्यु \times इह}$ अत्र, द्युज्याज्ञानार्थं चरज्ययानुपातः यदि प्रथमखण्डेन द्वादशभागाः क्रान्तिर्लभ्यते तदेष्टचरेण किं ज्ञाता

क्रा = $\frac{१२ च}{प्रख}$ क्रज्या = $\frac{२१ \times १२ च}{१० प्रख}$

द्युज्या^{२} = $(१२०)^२ - \frac{४४१ \times १४४ च^२}{१०० \times प्रख^२}$ व्यासवर्गेण

द्युज्या $= १२० - \frac{४४१ \times १४४ \text{ च}^२}{१०० \times \text{प्रख}^२ \times २४०} = १२० - \frac{४४१ \times ३ \text{ च}^२}{१०० \times ५ \times \text{प्रख}^२}$

ततः $\frac{१२००}{\text{द्यु}} = \frac{१२०१}{१२० - \frac{४४१ \times ३ \text{ च}^२}{१०० \times ५ \times \text{प्रख}^२}} = १० + \frac{४४१ \times ३ \text{ च}^२}{१२० \times १० \times ५ \times \text{प्रख}^२}$

$= १० + \frac{१३२३ \text{ च}^२}{२५० \times २४ \text{ प्रख}^२} = १० + \frac{५ \text{ च}^२}{२४ \text{ प्रख}^२}$ स्वल्पान्तरात् अस्य स्वरूपान्त

$= १० + \frac{६ \text{ च}^२}{२४ \text{ प्रख}^२} - \frac{\text{च}^२}{२४ \text{ प्रख}^२} = १० + \frac{\text{च}^२}{४ \text{ प्रख}^२} - \frac{\text{च}^२}{४ \text{ प्रख}^२ \times ६}$

$= १० + \left(\frac{\text{च}}{२ \text{ प्रख}}\right)^२ - \left(\frac{\text{च}}{२ \text{ प्रख}}\right)^२ \times \frac{१}{६}$ ततः दृष्टकर्णमानं

$= \frac{\text{पक}}{\text{इ ह}} \left\{ १० + \left(\frac{\text{च}}{२ \text{ प्रख}}\right)^२ - \left(\frac{\text{च}}{२ \text{ प्रख}}\right)^२ \times \frac{१}{६} \right\}$ अत उपपन्नं कर्णानयनं

शेषोपपत्तिः सुगमा ॥

इदानीं कर्णाचलमाह ।

श्रुतिविभक्तहतिस्तु हरो भवेत्स पतितः खहरादवशेषकम्
पृथगिदं खखनन्दहतं हरेत्खविषयैरवशेषविवर्जितैः ॥ १९ ॥

फलपदं हि नतं यदि शेषकं दिगधिकं हर एव तदुच्यते ।
इति कृतं लघु कार्मुकशिञ्जिनीग्रहणकर्म्म विना द्युतिसाधनम् ॥ १२ ॥

अत्र श्रुतिविभक्तहतिस्तु हरो भवेत्स पतितः खहरादवशेषकं विलोमेन यदि नतं पञ्चदशाल्पं तदा $\frac{५० \text{ न}^२}{९०० + \text{न}^२}$ इदं भवति ततः समीकरणं

$\frac{५० \text{ न}^२}{९०० + \text{न}^२} = \text{शे} \therefore ५० \text{ न}^२ = ९०० \text{ शे} + \text{शे न}^२$

ततः $\text{न}^२ = \frac{९०० \text{ शे}}{५०} + \frac{\text{शे न}^२}{५०}$ अस्य शेषरहितं पदं नतक्षालमानं स्यात् ।

परन्तु यदि ऊर्ध्वलिखितसमीकरणे शे $= १०$ तदा नतमानं पञ्चदशाधिकं तच्छेदहरः $=$ विद $-$ न $=$ उका अत उपपन्नं सर्वम् ।

इदानीं क्रान्तिखण्डकानि क्रान्तिसाधनं चाह ।

रसाः क्रान्तिखण्डानि यमाङ्गरामाः कुब्ध्यग्नयो गोनववाहवश्च ।
पट्च्यश्विनः खेषुभुवो द्विवाणा युक्तायनांशग्रहबाहुभागाः ॥ १३ ॥
तिथ्युद्धृता लब्धसितानि तानि योज्यानि भोग्याहृतशेषकस्य ।
तिथ्यंशकैः क्रान्तिकला भवन्ति युक्तायनांशग्रहगोलदिक्काः ॥ १४ ॥

अत्र सायनपञ्चदशभागानां क्रान्तिकलाः प्रसाध्य क्रान्तिखण्डकानि पठितानीति सुगमा वासना ।

इदानीं प्रकारान्तरेण क्रान्तिमाह ।

भुजांशोननिघ्नाः खनागेन्दवस्तन्नगाश्वांशहीनैस्त्रिवेदाब्धिभिस्ते ।
कलाष्टादशोनैर्विभक्ता लवादिर्भवेत्क्रान्तिरेवं विना खण्डकैर्वा ॥ १५ ॥

अत्र भुजज्या $= \frac{(१८० - भु)\ भु \times ४८०}{४०५०० - (१८० - भु)\ भु}$ ततः क्रान्तिः

$$\frac{(१८० - भु)\ भु \times ४८० \times २४}{१०\left\{४०५०० - (१८० - भु)\ भु\right\}} = \frac{(१८० - भु)\ भु \times ९६}{४०५०० - (१८० - भु)\ भु} = \frac{(१८० - भु)\ भु}{४२२ - \frac{१५}{६०} - (१८० - भु)\frac{भु}{६६}}$$

अत्र हरे वियोज्यवियोजकयोर्द्वयोरधिका संख्या गृहीता स्वल्पान्तरात्फलतुल्यत्वात् तेन क्रा $= \frac{(१८० - भु)\ भु}{४४३ - \frac{१५}{६०} - (१८० - भु)\frac{भु}{६६}}$ अत उपपन्नं सर्वम् ।

इदानीं पलांशानाह ।

दशाभ्यन्विताक्षप्रभापष्टिभागोऽक्षकर्णान्वितस्तेन भक्ताक्षभा सा ।
घनघ्नाहता दक्षिणाः स्युः पलांशाः पलाः संस्कृताः क्रान्तिभागैर्नतांशाः ॥ १६ ॥

इतीह भास्करोदिते महागमे फुटूहले ।
विदग्धबुद्धिवल्लभे रविप्रियाप्रसाधनम् ॥ १७ ॥

रविप्रियाप्रसाधनं छायासाधनं शेषं स्पष्टार्थम् ।

अत्रोपपत्तिः । लं $= ९० - च$, लज्या $= \frac{(९० + च)(९० - च) \times ४८०}{४०५०० - (९० + च)(९० - च)}$

$= \frac{(१५ + \frac{च}{६})(१५ - \frac{च}{६}) \times १२ \times ४०}{१\left\{२५ - (१५ + \frac{च}{६})(१५ - \frac{च}{६})\right\}}$ अत्र $\frac{च}{६} = फ$ ततो लम्बज्यामानं

$= \frac{(९०००-४०फ^२)१२}{९००+फ^२} = \frac{१२\times १२०}{पक}$ वा, $\frac{२२५-फ^२}{९००+फ^२} = \frac{३}{पक}$

छेदगमेन २२५ पक − फ^२ पक = ९०० × ३ + ३ फ^२

पक्षान्तरनयनेन, २२५ पक − ९००×३ = फ^२(पक + ३) ∴ $फ^२ = \frac{२२५(पक-१२)}{पक+३}$

वा, $फ^२ = \frac{२२५(पक-१२)(पक+१२)}{(पक+३)(पक+१२)} = \frac{२२५वि^२}{पक^२+१५पक+३६}$

ततः $फ = \sqrt{\frac{२२५वि^२}{पक^२+१५पक+३६}} = \frac{१५वि}{\sqrt{पक^२+१५पक+३६}}$ अत्र

$\sqrt{पक^२+१५पक+३६} = \sqrt{पक^२+१५पक+३६-\left(\frac{४१०}{६०}\right)^२+\left(\frac{४१०}{६०}\right)^२}$

$= \sqrt{पक^२+\frac{४१}{३}पक-\frac{४१}{३}पक+१५पक+३६-\left(\frac{४१०}{६०}\right)^२+\left(\frac{४१०}{६०}\right)^२}$

$= पक + \frac{४१०}{६०} + \frac{\frac{५}{३}पक+३६-\left(\frac{४१०}{६०}\right)^२}{२पक+\frac{४१०}{३०}}$ स्वल्पान्तरात् अत्र भिन्नसंख्यायाः

$\frac{\frac{५}{३}पक+३६-\left(\frac{४१०}{६०}\right)^२}{२पक+\frac{४१०}{३०}}$ एक पलभायां मानं $= \frac{१}{६०}$ ततोऽनुपातेनेष्ट-

पलभायां मानं $= \frac{वि}{६०}$ ततः पूर्वमूलस्य रूपान्तरं $= पक + \frac{४१०}{६०} + \frac{वि}{६०}$

ततः $फ = \frac{१५वि}{पक+\frac{४१०+वि}{६०}}$ षड्गुणितेन पलांशाः $= \frac{९०वि}{पक+\frac{४१०+वि}{६०}}$

अत उपपन्नं सर्वमिति ।

श्रीकृपालुतनयेन निर्मिते वासनावरविभूषणे वरा ।
सूर्यभादिगणितस्य वासना सूक्तियुक्तिसहिताऽत्र सङ्गता ॥

इति करणकुतूहलवासनाविभूषणे छायादिसाधनाधिकारः ।

अथ चन्द्रग्रहणाधिकारस्तत्र नतकर्माह ।

नतविहीनहतेः खगुणैर्हृताः खशरभानुभुवो दशवर्जिताः ।
रविहरः स विधोर्विदशांशको निजफले निजहारहृतं क्रमात् ॥ १ ॥
धनमृणं परपूर्वनते रवौ शशिनि पूर्वनते स्वमृणे फले ।
इतरथोभयतोऽपि फलक्षयः स्फुटतरौ ग्रहणे च ततस्थितिः ॥ २ ॥
इति नतक्रममौर्विकयोदितं क्रमजमेव हि जिष्णुजसम्मतम् ।
यदपरैः कृतमुत्क्रमजीवया बलनदृङ्नतकर्म न तन्मतम् ॥ ३ ॥

स्पष्टार्थम् ।

अत्रोपपत्तिः । तिथ्यन्तनाडीनतबाहुमौर्व्यैत्यादिनैव तत्र नतकालानां ज्ञात्वा श्रीपतिप्रकारेण साधिता तत्क्षणा रवौ नतकर्मसंस्कारमानं

$$= \frac{(१८० - ६न) ६न \times ४८० \times रफ}{४९२० \{४०५०० - (१८० - ६न) ६न\}} = \frac{(३० - न) न \times ४८० \times रफ}{४९२० \{११२५ - (३० - न) न\}}$$

$$= \frac{४८० \times रफ}{४९२ \left\{\frac{११२५०}{(३० - न) न} - १०\right\}} = \frac{रफ}{\frac{११२५०}{(३० - न) न} - १०}$$ स्व०, अत्र हरस्य

हारतुल्या क्षणता एवं चन्द्रस्य $= \frac{४८० \times चफ}{४३६ \left\{\frac{११२५०}{(३० - न) न} - १०\right\}}$

$$= \frac{चफ}{४३६ \left\{\frac{११२५०}{(३० - न) न} - १०\right\}} = \frac{चफ}{\frac{९}{१०} \left\{\frac{११२५०}{(३० - न) न} - १०\right\}}$$

इत्युपपत्तिः सुगमा ।

इदानीं तात्कालिकीकरणादीन्याह ।

यातेष्यनाडीगुणिता द्युभुक्तिः षष्ट्या हृता तद्रहितो युतश्च ।
तात्कालिकः स्यात्खचरः शशीनो पर्वान्त एवं सम्लिप्तिको स्तः ॥ ४ ॥
शरोनतात्कालिकचन्द्रदोर्ज्या विघ्नी कृताप्ता च शरोऽङ्गुलादिः ।
शरोनयोतद्युतिगोलदिक् स्यान्मेषादिषड्वं खलु सौम्यगोलः ॥ ५ ॥
याम्योऽपरं कर्किमृगादिषट्कं ते षायने दक्षिणसौम्यके स्तः ।

खाश्वाः शराङ्गानि रसेषवोऽग्निवेदाश्च धिष्ण्यानि खगाः शरस्य ॥ ६ ॥
खण्डानि तैः क्रान्तिवदत्र साध्यो बाणः कलादिस्त्रिहृतोऽङ्गुलादिः ।

स्पष्टार्थं । तात्कालिकीकरणवासना चातिसुगमा शरानयनं तु त्रैराशिकेन त्रिज्यया परमशरस्तद्देष्टदोर्ज्यया किं ततोऽङ्गुलार्थं कलादिकः शरस्त्रिभक्तस्तत्स्वरूपं च = $\frac{२७० \times \text{दोर्ज्या}}{१२० \times ३} = \frac{३ \times \text{दोर्ज्या}}{४}$ शरस्य प्रकारान्तरं तु पञ्चदशभागलभ्यानि कलात्मकानि शरखण्डकानि पठितानीति ।

इदानीं बिम्बान्याह ।

बिम्बं विधोः स्यात्स्वगतिर्युगाद्रिभक्ता रवेर्दस्रहता शिवाप्ता ॥ ७ ॥
त्रिघ्नीन्दुभुक्तिस्तुरगाङ्गभक्ता भूमार्कभुक्त्यद्रिलवेन हीना ।
राहुः कुभामण्डलगः शशाङ्कं शशाङ्कगश्छादयतीनबिम्बम् ॥ ८ ॥
यच्छाद्यसंछादकमण्डलैक्यखण्डं शरोनं स्थगितं तदाहुः ।
छन्नं पुनः छाद्यविवर्जितं तत्खच्छन्नमेतन्निखिलग्रहे स्यात् ॥ ९ ॥

स्पष्टार्थं ।

अत्रोपपत्तिर्भानोर्गतिः स्वदशभागयुतार्द्धितावेत्यादिनैव तत्र कलात्मकं बिम्बं प्रसाध्य त्रिभिर्भक्तमङ्गुलकरणार्थं तत्र चन्द्रस्य स्पष्टमेव रवेः वि = $\frac{११ \text{ रग}}{९०}$ गुणकार्धापवर्त्तनेन र०वि० = $\frac{२ \text{ रग}}{११}$ भूभासाधने तु भानोर्गतिः शरहता रविभिर्विभक्ता इत्यादिनाङ्गुलकरणेन भूभा = $\frac{२ \text{ चग}}{१५ \times ३} - \frac{५ \text{ रग}}{१२ \times ३}$ = $\frac{२ \times ३ \text{ चग}}{१५ \times ३ \times ३} - \frac{५ \text{ रग}}{३९} = \frac{२ \times ३ \text{ च}}{१३५} - \frac{५ \text{ रग}}{३९} = \frac{३ \text{ चग}}{९७} - \frac{\text{रग}}{७}$ अत उपपन्नं बिम्बानयनं शेषोपपत्तिर्विमला ।

इदानीं स्थित्यर्धादिमाह ।

द्विघ्नाच्छराच्छन्नयुताहतात्पदं खाष्टेन्दुनिघ्नं विवरेण गत्योः ।
भक्तं स्थितिः स्यात् घटिकादिरेवं खच्छन्नतो मर्दमपि प्रजायते ॥ १० ॥
विक्षेपतो नागयुगैर्विभक्तान्नाड्यादिकं यत्फलमत्र लब्धम् ।
द्विघ्ना स्थितिस्तेन युता विहीना स्यातां क्रमात्स्पार्शिकमोक्षिके ते ॥ ११ ॥

अन्ये पदे पातयुतो विधुश्चेद्युग्मेऽन्यथैवं स्थितिवद्विमर्दः ।

स्पष्टार्थं ।

अत्रोपपत्तिः । तत्रैकघटिकायां मध्यमा शरगतिः = $\frac{७९३ \times २ \times २७०}{६० \times १२० \times ६०}$

= १′

मध्यमगत्यन्तरं चैकघटीभवं रवीन्दोः = $\frac{७३३}{६०}$ = १२′

अथ कल्प्यते य = स्थित्यर्धघटी तदोज्यपदे सपातचन्द्रे स्पर्शशरः = ३ मश − य ततो मानार्धयोगान्तरयोः कृतिभ्यामित्यादिना स्थित्यर्धक-लाः गः = ९ मा² − (३ मश − य)² = ९ (मा² − मश²) + ६ मश · य − य² ततः गत्यन्तरवर्गेण भक्तं लब्धं स्थित्यर्धघटीवर्गमानं

$$= \frac{९(मा^२ - मश^२) + ६ मश \cdot य - य^२}{१४४} = य^२$$

वा, १४५ य² − ६ मश · य = ९ (मा² − मश²)

= ९ (मा + मश) (मा − मश) = ९ (छ + २ मश) छ उभयोर्मू-

लाभ्यां य − $\frac{६ मश}{१४५ \times २}$ = $\frac{३ भू}{१२}$ स्वल्पान्तरात्

∴ य = $\frac{६ मश}{१४५ \times २} + \frac{३ भू}{१२} = \frac{मश}{४८} + \frac{१८० भू}{७२०}$ मौलिकेऽपीयं क्रिया धनर्ण-व्यत्यासेन विमर्दार्धेऽपि तथैव साध्ये युग्मपदे सपातचन्द्रे विपरीता क्रिया भवति यस्य ह्रासात् शेषं स्पष्टम् ।

इदानीं स्पर्शादिकमाह ।

सूर्योदयादस्तमयाच्च गम्ये मध्यग्रहः पर्वविरामकाले ॥ १२ ॥
स्थित्या विमर्दैन विवर्जितेऽस्मिन् तत्स्पर्शसम्मीलनके क्रमेण ।
युक्तेऽथ तस्मिंस्थितिमर्दकाभ्यां मुक्तिस्तयोन्मीलनकं निजाभ्याम् ॥ १३ ॥
घाताहतं स्वद्युदलेन भक्तं स्पर्शे विमुक्तौ च नतं लवाः स्युः ।
तज्ज्याहता अत्रलवा विभक्तास्त्रिभज्यया प्रागपरे नते स्यात् ॥ १४ ॥
सौम्यान्तकार्धं बलनं ग्रहस्य युक्तायनांशस्य तु कोटिजीवा ।
बाणेर्विभक्ताऽयनदिक् तथाऽन्यद्भागाद्यमेकान्यदिशोस्तयोश्च ॥ १५ ॥

योगान्तरज्याहतमानयोगखण्डं, त्रिभज्याहृतमङ्गुलाद्यम् ।
स्फुटं भवेत्तद्वलनं रवीन्द्वोः प्राग्यासमोक्षे विपरीतदिक्कम् ॥ १६ ॥
मध्यः शरस्त्वोजपदोद्भवश्चेत्स्थित्यग्निभागोनयुतो युतोनः ।
युग्मे विधोर्वा प्रथमान्त्यबाणौ चन्द्रग्रहे व्यस्तदिशः शराः स्युः ॥ १७ ॥

स्पष्टार्थं । उपपत्तिरपि सुगमा अक्षजायनवलनयोरंशानुपातः

यथा प्र॰ ज॰ व॰ अं॰ = $\frac{\text{ज्या}\cdot \text{अ}\cdot \text{अं}\cdot}{\text{त्रि}}$ आव अं = $\frac{२४\cdot \text{खेकोज्या}}{१२०} = \frac{\text{खेकोज्या}}{५}$

अथ स्पर्शमोक्षयोः शरार्थं त्वनुपातः घटिकयैकया एककला शर[illegible] सदा स्थित्यर्धघटीभिः किं अङ्गुलार्थं त्रिभिर्भक्ताः शरकलाः । धनर्णवासना [illegible]मो-क्षवशात् सुगमा । अन्यच्चातिसरलम् ।

इदानीं परिलेखमाह ।

ग्राह्यार्धसूत्रेण विधायवृत्तं मानैक्यखण्डेन च साधितांशम् ।
ग्राह्येऽथ वृत्ते वलनं यथार्शं प्राक् स्पार्शिकं पश्चिमतश्च मोक्षम् ॥ १८ ॥
देयं रवेः पश्चिमपूर्वतस्ते ज्यावच्च बाणौ वलनायकाभ्याम् ।
उत्पाद्य मत्स्यं वलनायकाभ्यां मध्यः शरस्तन्मुखपुच्छसूत्रे ॥ १९ ॥
केन्द्राद्यथार्शेऽथ शरायकेभ्यो वृत्तेः कृतेर्ग्राहकखण्डकेन ।
स्युः स्पर्शमध्यग्रहमोक्षसंस्था अथाङ्कयेन्मध्यशरायचिन्हात् ॥ २० ॥
आद्यन्तबाणाग्रगते च रेखे ज्ञेयाविमौ ग्रग्रहमुक्तिमार्गौ ।
मानान्तरार्द्धेन विलिख्य वृत्तं केन्द्रेऽथ तन्मार्गयुतिद्वयेऽपि ॥ २१ ॥
भूमार्धसूत्रेण विधाय वृत्ते सम्मीलनोन्मीलनके च वेद्ये ।
मार्गप्रमाणे विगणय्य पूर्वं मार्गाङ्गुलघ्नं स्थितिभक्तमिष्टम् ॥ २२ ॥
इष्टाङ्गुलानि स्युरथ स्वमार्गे दद्यादिमानीष्टवशात्तदग्रे ।
वृत्ते कृते ग्राहकखण्डकेन स्यादिष्टकाले ग्रहणस्य संस्था ॥ २३ ॥
इतीह भास्करोदिते ग्रहागमे कुतूहले ।
विदग्धबुद्धिवल्लभे शशिग्रहप्रसाधनम् ॥ २४ ॥

स्पष्टार्थं वासनापि सर्वा सरला सिद्धान्तोक्तिवत् ।
श्रीकृपालुतनयेन निर्मिते वासनावरविभूषणे वरा ।
चन्द्रपर्वगणितस्य वासना सूक्तियुक्तिसहिताऽत्र सङ्गता ॥

इति करणकुतूहलवासनाविभूषणे चन्द्रग्रहणाधिकारः ।

अथ सूर्य्यग्रहणाधिकारस्तत्रादौ लम्बनमाह ।

दृग्ज्ञान्तकाले त्रिभहीनलग्नं कार्य्यं च तत्क्रान्तिपलान्तरैक्यम् ।
भिन्नैक्यदिक्त्वे नतभागकाः स्युः खाङ्कुच्युतास्ते पुनरुन्नतांशाः ॥ १ ॥
त्रिभोनलग्नार्कविशेषशिञ्जिनी खरामभक्ता घटिकादि लम्बनम् ।
तद्विज्यानिहतं नखेन्दुभिर्भक्तं स्फुटं स्यात्स्वमृणं तिथौ क्रमात् ॥ २ ॥
त्रिभोनलग्नेऽधिकहीनके रवेस्ततोऽसकृल्लग्नविलम्बनादिकम् ।

स्पष्टार्थे ।

अत्रोपपत्तिर्मध्यनतांशसमभिष्टनतांशमानं त्रिभस्य प्रकल्प्य घटिकादिष्टयं परमलम्बनं च ततो लम्बनसाधने मूलोक्ता क्रियोत्पद्यते ।

इदानीं नतिमाह ।

नतांशजीवार्कफलान्वितार्कहृन्नतांशदिक्कार्कुलपूर्विका नतिः ॥ ३ ॥

स्पष्टार्थे ।

अत्रोपपत्तिरनुपातेन यदि त्रिज्यया परमा नतिस्तदा द्वादशभा किं
ततोऽङ्गुलकरणार्थं त्रिभक्ता तत्स्वरूपं $= \frac{४८ \times दृज्ये}{१२० \times त्रि} = \frac{१६ \times दृज्ये}{४५ \times ८} = \frac{१३ \times दृज्ये}{१३ \times ८}$
यत उपपन्नम् ।

इदानीं प्रकारान्तरेण लम्बनमाह ।

खप्राद्रयः कुमनवोऽष्टधृतिर्नवेन्दु-
दस्राः शरन्नियमलाः खजिनाश्च पिण्डाः ।
षट्चाश्विनो जिनयमा द्विशती त्रिभोन-
लग्नार्कयोर्विवरभागमितेर्भवाप्तम् ॥ ४ ॥
पिण्डे गतस्त्वगतयातविशोधनिघ्न-
शेषेशभागरहितः सहितश्च भोग्ये ।
ऊनाधिके खरसहृत्फलु लम्बनं वा
प्राग्वत् स्फुटं सकृदतो नतिरन्यलग्नात् ॥ ५ ॥

पिण्डैरन्यलम्बनमागच्छेत्तत्प्राग्वत् स्फुटं कार्य्यमर्कादुक्तलम्बनमुणं चार्कैर्भं तं कर्त्तव्यं शेषं स्पष्टार्थम् ।

अत्रोपपत्तिः । असकृत्कर्मोपसंहारार्थे स्थूला अपि तारतम्यान्नाथ पठिताः ।

इदानीं स्थित्यादिसाधनमाह ।

स्पष्टोऽर्च वाणो नतिसंस्कृतः स्याच्छन्नं ततः प्राग्वदतः स्थितिश्च
स्थित्योनयुक्ताद्गणितागताच्च तिथ्यन्ततो लम्बनकं पृथक्स्थम् । १
स्वर्णं च तस्मिन्प्रविधाय साध्यस्तात्कालिकः स्पष्टशरः स्थितिश्च
तयोनयुक्ते गणितागते च स्वर्णं पृथक्स्थं मुहुरेवमेतौ ॥ ७ ॥
स्यातां स्फुटौ ग्रहमुक्तिकालौ सकृत्कृते लम्बनके सकृत्स्तः ।
तन्मध्यकालान्तरगे स्थिती स्फुटे शेषं शशाङ्कग्रहणोक्तमत्र हि ॥ ८ ॥
अर्कांशकोऽर्कस्य विधोर्नृपांशो नादेशनीयः खलु खण्डितोऽपि ।
अल्पार्धसर्वग्रहणे शशी स्याद्ताम्रोऽसितो बभ्रुरितस्तु कृष्णः ॥ ९ ॥
इतीह भास्करोदिते ग्रहागमे कुतूहले ।
विदग्धबुद्धिवल्लभे रविग्रहप्रसाधनम् ॥ १० ॥

स्पष्टार्थं वासना सिद्धान्तोक्तैव ।

श्रीकृपालुतनयेन निर्मिते वासनावरविभूषणे वरा ।
सूर्यपर्वगणितस्य वासना सूक्तियुक्तिसहिताऽत्र सङ्गता ॥

इति करणकुतूहलवासनाविभूषणे सूर्यग्रहणाधिकारः ।

अथोदयास्ताधिकारस्तत्रादौ गुरोरुदयास्तावाह ।

इष्टोऽन्हां निचयोऽब्दद्विगुणवयुतः पञ्चाभ्रभूवर्जितो
भक्तो नन्दनवाग्निभिस्तिथिमितैः शेषैर्गुरोरुद्गमः ।
अस्तो वेदगजाग्निभिस्तदधिकैरुनैर्गतेष्यैर्दिने-
स्तात्कालार्कघटीफलं च तिथिवत् सूर्याहतं शोधके ॥ १ ॥
राशिभ्यामुदये युताद्दिनकरादस्ते त्रिभिः संयुता-
द्व्योक्तार्कघटीफलं च खगुणैः क्षुण्णं धनर्णे तथा ॥
सङ्क्रान्तेरुदयात्खखाग्निरहितात्तिथ्याहतात्स्वोदये-
नाप्तं तच्च गुरूदये धनमृणं चास्ते तु तत्सप्तमात् ॥ २ ॥

तत्कालार्कघटीफलं द्व्योक्तार्कघटीफलं अत्र यदि तत्कालार्कघटीफलं द्वादशगुणं कृत्वा संस्क्रियते तदा सूक्ष्ममन्यथा स्थूलमिति ज्ञेयम् ।

षष्ट्योक्तं घटीफलं च "कर्के मृगे त्रयः षट्कं सिंहे कुम्भे गजा दश ।
कन्यामीने भवा रुद्रास्तुलामेषे शिवा दश ॥ वृषेऽलौ च गजास्तर्का
धनिनृग्मे त्रिशून्यकम् । रविनाडो मृगाद्ये स्व कर्क्यादौ तद्गुणं क्रमात्" ॥

एतद् घटीफलं स्थिरं मन्दोच्चं प्रकल्प्य प्रत्येकराशिस्थे रवौ मन्दफलमानं । तत्कला द्वादशभक्ता फलं घटिकादिकं कृत्वा रविराशिस्थाने स्थापितं यथा रविः = १० केन्द्रम् = ५ स्व० ततः पूर्वविधिना मन्दफलं कलादिकं = द्वादशभक्तं लब्धं ६ स्व० एवं सर्वेषां ज्ञेयं शेषं स्पष्टार्थम् ।

अत्रोपपत्तिः । कल्पे गुरुरव्योर्युतिर्भगणान्तरसमा ततोऽनुपातो-
गणान्तरेण कुदिनानि तदा युत्यैकया किं लातमेकयुतिकालमानं = $\frac{\text{ककु}}{\text{भग}}$

$$= ३९९ + \cfrac{१}{१ + \cfrac{१}{८ + \cfrac{१}{२० + \cfrac{१}{१ + \cfrac{१}{३ + \cfrac{९३३०५}{७६६२९४}}}}}}$$

अस्या चमानानि = ३९९, ३९८ $\frac{८}{९}$, ३९८ $\frac{१६१}{१८१}$ इत्यादि अत्रावाप्येण ३९९ दं गृहीतं तेन दशघ्ने वास्तवसंचमानाभ्यां युतेरग्राच्छेषदिनमाने ६०, ६१ यतो ६ शभिर्वर्षैरेकदिनमधिकं कर्त्तव्यं यन्यारम्भात् पञ्चशून्यैकदिनेषु युतिकालो लातस्ततस्ताः संख्या ऊनीकृताः । अथ ३९९ चाभिस्तष्टे दिनगणे शेषमानं यदि पञ्चदश तदा गुरोरुदयो यतो गुरोः शक्रकालांशास्तद्दिनानि पञ्चदश भवन्ति, एवं युतिकालात्पूर्वं पञ्चदशदिने गुरोरस्तः अथवा पञ्चदश दिनोनयुतिकालदिनसमे शेषे । परं तदा गुरुमन्दफलेनान्तरितो भवति अथ रवेर्मन्दोच्चं = २ । १५° गुरोः = ६ अस्ते गु = र + १५° गुमके = ६ − १५° − र = ५ + १५° − र = ८ + १५° − (र + ३) अस्य भुजः = २ + १५° − (र + ३) एतोर्ज्यैघटीफलं सचिभार्कैणाच उदये तु गु = र − १५°, गुमके = ६ + १५° − र = ८ + १५° − (र + २) अस्य भुजः = २ + १५° − (र + २) अतस्तच्च सचिभार्कैण साधनीयं तदा रविसमे मन्दफले गुरोर्घटीफलं भवेत् तद्वि-

परममन्दफलेन भक्तं गुणपरममन्दफलेन गुण्यं ततो द्वादशगुणं गुरुमदप
फलादिकं स्यात् तत्स्वरूपं गुमफ = $\frac{\text{रघफ} \times ५ \times १२}{२}$ = ३० रघफ इदं।
न्द्रगत्या भक्तं दिनं = $\frac{३० \times \text{रघफ}}{५५}$ षष्टिगुणं घटी = ३० रघफ इदं, न
संस्कार्य्यं अथ तदा संक्रान्तेरुदयो ज्ञातव्यः क्षेत्रकलाविषुवक
=६उ−१८०० अतोऽनुपातो यदि उदयमानपलैस्तदन्तरं तदा कालांशपलै
ब्धं कलात्मकमन्तरं तत्षष्टिभक्तं दिनादिकं स्यात्तत्स्वरूपं = $\frac{६(उ-३००) \times १५ \times १}{उ \times ६०}$
= $\frac{१५(उ-३००)}{उ}$ अत्र स्वल्पान्तरात् तिथिमिताः कालांशा एहीतास्तत
उपपन्नं सर्वमन्यत् सरलम्।

इदानीं भृगोरुदयास्तानाह।

पञ्चेशोनगणोऽब्धिभूपलवयुग्वेदाष्टबाणैर्हृतः
पश्चात्षट्कृतिभिर्नगाष्टयुगलैः शुक्रोदयास्तौ क्रमात्।
शेषैः प्राङ्नगगोयमेर्गजयुगप्राणैस्तदानीं च य-
स्तिग्मांशोरुदयः खखाग्निरहितः पश्चात्तु तत्सप्तमः ॥ २ ॥
क्षुण्णः पञ्चगुणैः शरैश्च विशिखैरङ्काग्निसंख्यैः क्रमात्
भक्तः स्वेन च भोदयेन फलयुक् प्राक्शेषकैरुद्गमः।
ज्ञेयश्चास्तमयः फलेन रहितैः शोध्यं न शुद्धेद्यदा
कार्य्यं व्यस्तविशोधनं धनमृणं व्यस्तं तदुत्थं तदा ॥ ३ ॥

षट्कृतिः षट्त्रिंशच्छेषं स्पष्टार्थं।

अत्रोपपत्तिः। भृगोः केन्द्रभगणोत्थदिनमानं = ५८३ + $\frac{१}{१ + \frac{२७८०१३३२८}{२४२३३७६१६४}}$
आचार्येण स्वल्पान्तरात् ५८४ इदं गृहीतं तत्र षोडशवर्षे वास्तवासन्नमा-
नाभ्यां शेषमाने ५, ४ अतः षोडशवर्षैरेकदिनमधिकं कर्त्तव्यं पञ्चाभ्रात्
पञ्चभवदिनैः केन्द्रभगणपूर्त्तिर्जाता अतस्ताः संख्या ऊनीकृताः। अथ भग-
णपूर्त्तेः प्रागेव षट्त्रिंशद्दिनैः पूर्वास्तः अथ पश्चिमोदयः एवं नीचात्प्रागेव

पञ्चविंनेः पश्चिमास्तः अन्ये पूर्वोदयः । अथवापि क्षेत्रकलाविषुवत्कलान्तरतोऽ पातः यदि उदयपलैस्तदन्तरं तदा षट्त्रिंशद्दिनांशादिपलैः किं तत् षष्टिहृतं दिनादि तत्स्वरूपं = $\frac{६(उ-३००)३६\times१०}{उद\times६०} = \frac{(उ-३००)\times३६}{उद}$

अयं षट्त्रिंशत्स्थाने स्वल्पान्तरात् पञ्चत्रिंशद्गृहीतं उदये धनं अस्ते ऋणं विपरीतशोधने विपरीते अन्यत् स्पष्टम् ।

इदानीं वक्रादिकेन्द्रांशमाह ।

वक्रेन्द्रभागैस्त्रिनृपैः शरेन्द्रैस्तत्वेन्दुभिः पञ्चनृपैस्त्रिरुद्रैः ।
रन्ध्राद्वक्रता भूमिसुतादिकानामवक्रता तद्रहितैश्च भांशैः ॥ ५ ॥
प्राच्यामुदेति क्षितिजोऽष्टदस्रैः शुक्रोगुरुः सप्तकुभिश्च मन्दः ।
स्वस्वोदयांशोनितवक्रभागैस्त्वयो व्रजन्त्यस्तमयं प्रतीच्याम् ॥ ६ ॥
वक्रवक्रास्तमयोदयोक्तभागाधिकोनाः कलिका विभक्ताः ।
वेदेन्द्रभक्त्याप्तदिनैर्गतेष्यैरवक्रवक्रास्तमयोदयाः स्युः ॥ ७ ॥
सूर्याः सप्तदश क्षिभूपरिमिता रुद्रा नवाब्धीन्दवः
कालांशाः शशितोऽनृजोः कुरहिता याता कुजाद्राशयः ।
रुद्रांशाङ्कदशद्विपा अथ लवा अष्टौ ग्रहाः कुञ्जराः
क्रांत्यं शैलभुवः स्वचञ्चुलफलैर्व्यस्तैरमी संस्कृताः ॥ ८ ॥
दाभ्यां बुधशुक्रयोरथ कुजाद्विक्षेपकाः खेश्वरा
द्वीक्ष्माः षडगाः षडग्निशशिनः खचीन्दवो लिप्तिकाः ।
खेत्पातयुतान्तया क्षितयोः शीघ्रोच्चतो दोर्ज्यका
वेदघ्नो बलकर्णहृच्चिविहृता स्याद्भुजाद्यः शरः ॥ ९ ॥

अनृजोः गुरुबुधयोरितिशेषः भौमादीनां पाता राश्याद्याः
भौ ११ । ८ । बु ११ । ९ । गु ९ । ८ । शु १० । ० । श ८ । १० । शरकलाः
भौ ११० बु १५२ गु ९६ शु १३६ श १३० । शेषं स्पष्टार्थम् ।
अत्रोपपत्तिः सुगमा सिद्धान्तोक्त्या ।

इदानीं वृद्धिमाह ।

प्राक्पश्चात्क्षिभहीनयुक्तखचरक्रान्त्यक्षतोंऽशा नताः
गुर्वाद्यास्ते नक्षतैः स्युरुन्नतलघाः साध्ये पृथक् तज्ज्यके ।

क्षेपघ्नी नतशिञ्जिनी गुणगुणा भक्तोन्नतांशज्यया
स्वर्णं लब्धकला यहे शरनतांशैक्यान्यदिक्के क्रमात् ॥ १० ॥

स्पष्टार्थम् ।

अत्रोपपत्तिः । क्षितिजस्थयहबिम्बे शरः कोटिः स्पष्टदृक्कर्मकृता भुजः क्षितिजे कर्ण इति चापजात्यमृजुजात्यं मत्वा क्रान्तिवृत्तक्षितिजसम्पातोत्पन्नः कोणो विक्षिप्तस्योन्नतांशास्तत्र यहस्थानसमं लग्नं मत्वा विक्षिप्तं साधितं तन्नोन्नतांशमाने च दिनार्द्धवत् ततोऽनुपातेन दृक्कर्मकलाः साधिता इति । धनर्णवासना गोलोक्त्या

इदानीमुदयास्तसाधनमाह ।

पंश्चाद्यास्तमितीह दृष्टिपथगस्तत्सूर्य्ययोरल्पकः
कल्प्योऽर्कस्त्वपरस्तनुश्च घटिकाः प्राग्वत्तयोरन्तरे ।
पश्चात्षड्युजोस्तु ता रसहताः कालांशकाः सन्ति तैः
प्रोक्तभ्योऽभ्यधिकैर्गतः समुदयो न्यूनैस्तु गम्यस्ततः ॥ ११ ॥

व्यस्तश्चास्तमयस्तदन्तरकलाः खाभ्राग्निभिः सङ्गुणा
भानोः राश्युदयेन चेदपरतस्तत्सप्तमेनोद्धृताः ।
ताः स्युः क्षेपकला जवान्तरहृता वक्रे जवैक्योद्धृता
यातेष्योऽस्तमयोऽथवा समुदयो ज्ञेयोऽथ लब्धैर्दिनैः ॥ १२ ॥

प्राग्दृग्ग्रहश्चेदधिको रवेः स्यादूनोऽथ वा पश्चिमदृग्ग्रहश्च
उक्तैर्युक्कालांशयुतेः कलाभिः साध्यास्तदानीं दिवसा गतेष्याः ॥ १३ ॥

स्पष्टार्थमुपपत्तिश्च स्फुटा सिद्धान्तरीत्या ।

इदानीमगस्त्योदयास्तावाह ।

अब्धभाष्टहतियुक्तवर्जिता अष्टगोमितलवा गजाद्रयः ।
तत्समे दिनमणौ च कुम्भभूर्याति दर्शनमदर्शनं क्रमात् ॥ १४ ॥
इतीह भास्करोदिते यहागमे कुतूहले ।
विदग्धबुद्धिवल्लभे खगोदयास्तसाधनम् ॥ १५ ॥

स्पष्टार्थम् ।

अत्रोपपत्तिः । अगस्त्यस्य मध्यमा क्रान्तिः = २४ स्वल्पान्तरात् स्पष्टा

क्रान्तिः = ५२ याम्या याभ्यां स्वल्पान्तराच्चरांशमाने $\frac{२४ \times ८ \times वि}{९ \times १०}$

$\frac{५२ \times ८ वि}{९ \times १०}$ स्फुटास्फुटक्रान्तिजयोश्चरार्द्धयोरित्यादिना स्पष्टचरांशसममेवा-

वजवृद्धयोर्भांशाः = $\frac{७७ \times ८ वि}{९०}$ = ८ वि स्वल्पान्तरात् । अथागस्त्यध्रुवांशाः

= ८७ पलांशाः = १२ ततः क्षेत्रांशा उदयास्तयोः क्रमेण ११, ९ कल्पिताः

अत एवं शेषं स्पष्टम् ।

श्रीकृष्णदैवज्ञतनयेन निर्मिते वासनावरविभूषणे वरा ।
उक्ताभास्तगणितस्य वासना सूक्तिर्युक्तिसहिताऽत्र सङ्गता ॥
इति करणकुतूहलवासनाविभूषणे खगोदयास्ताधिकारः ।

अथ चन्द्रशृङ्गोन्नतिः

क्रान्तिः कला सायकसंस्कृतेन्दोः सषड्भसूर्य्यापमसंस्कृता सा ।
व्यर्केन्दुदोर्ज्यागुणितैः पलांशैः खार्काद्भुतैरप्यथ संस्कृता च ॥ १ ॥
व्यर्केन्दुदोराशिभिरिन्द्रियघ्नैर्भक्ता भवेयुर्वलनाङ्गुलानि ।
व्युत्क्रान्तकोट्यंशशरेन्दुभागो हारोऽमुना षट्कृतितो यदाप्तम् ॥ २ ॥
द्विघ्नं च हारोनयुतं तदर्धं स्यातां क्रमादत्र विभास्वभाख्ये ।
विधाय सूत्रेण षडङ्गुलेन वृत्तं दिगङ्कं वलनं च वृत्ते ॥ ३ ॥
प्राक्शुक्लपक्षे परतस्तु कृष्णे केन्द्राद्विभां तद्वलनाग्रसंस्थे ।
कृत्वा विभाग्रे स्वभगा च वृत्तं विद्वीन्दुशृङ्गोन्नमनस्य संस्थाम् ॥ ४ ॥
इतीह भास्करोदिते यहागमे कुतूहले ।
विदग्धबुद्धिवल्लभे विधूच्चशृङ्गसाधनम् ॥ ५ ॥

स्पष्टार्थम् ।

उपपत्तिः । अत्र सूर्य्यास्तोदय एव शृङ्गोन्नतिः साधिता तथा व्यर्केन्दुसमश्चन्द्रशृङ्गः कल्पितस्तयोः स्पष्टक्रान्तिसमे चरांशमाने च प्रायः शृङ्गोन्नतेरभिचाराभावात्, ततः स्पष्टभुजः = २ चरक्रा ± २ क्रा ± चरांत

= २ चरक्रा ± २ क्रा ± $\frac{२ क्रज्या \cdot प}{१२०}$ अयं स्वात्मको भुजो द्विभक्तः शंशाः =

चस्फक्रा ± रक्रा ± $\frac{\text{अंज्या} \cdot \text{प}}{१२०}$ अत्र भिन्नदिशोरन्तरं समदिशोर्योग इत्यौत्तरार्धे सपड्भसूर्यात् क्रान्तिरानीता षड्भुजवृत्ते परिणामनार्थमनुपातो यदि व्यर्कन्दुदलपूर्णज्यया अयं तदा षड्भुजेन किं तत्स्वरूपं $\frac{\text{भु} \times \text{ए}}{२ \text{ अंदज्या}} = \frac{\text{भु ए}}{\text{अ रा} \times ३०}$

$= \frac{\text{भु}}{\text{अ रा प}}$ । शेषविधीनां वासना सुगमा सिद्धान्तविधिना ।

श्रीकृपालुतनयेन निर्मिते वासनावरविभूषणे वरा ।
उच्चशृङ्गगणितस्य वासना सूक्तियुक्तिसहिताऽत्र सङ्गता ॥
इतिकरणकुतूहलवासनाविभूषणे विधुशृङ्गोन्नतिः ।

अथ यहयुत्यधिकारस्तत्र बिम्बादिसाधनमाह ।

पञ्चाङ्गसप्ताङ्गशराः पृथक्स्थास्त्रिज्याशकर्णान्तरसङ्गुणास्ते ।
चिघ्नैः पराख्यैर्विहृताः फलोनयुक्ताः पृथक्स्थास्त्रिभमौर्विकायाः ॥ १ ॥

कर्णेऽधिकेने चिह्नता भवन्ति बिम्बाङ्गुलानीति कुजादिकानाम् ।
दिवाकसोरन्तरलिप्तिकोघान्नत्योर्वियोगेन हृताद्यदैक्यम् ॥ २ ॥

वक्रौ तदैक्येन दिनैरघाप्तैर्याता तयोः संयुतिरल्पभुक्तौ ।
वक्रेऽथवा न्यूनतरेऽन्यथैक्या द्वयोरनृज्वोर्विपरीतमस्मात् ॥ ३ ॥

एवं लब्धैर्यहयुतिदिनैश्चालितौ तौ समौ स्तः
कार्यौ बाणाविह शशिशरः संस्कृतोऽसौ स्वनत्या ।
एकान्याशौ यदि खगशरावन्तरैक्यं तयोर्यं-
द्याम्योदक्स्थद्युचरविवरं सिद्धभक्तं कराः स्युः ॥ ४ ॥

ज्ञेयौ खेटौ निजशरदिशावेकदिक्कोऽल्पबाणो
व्यस्ताशः स्यादितरखचरादन्तरं स्यात्स्फुटेषुः ।
मानैक्यार्धात्स तु यदि लघुर्भेदयोगस्तदानीं
कार्यं सूर्ययहवदखिलं कर्म यल्लम्बनाद्यम् ॥ ५ ॥

मन्दाक्रान्तोऽनृजुरपि रविः शीघ्र इन्दुः प्रकल्प्योऽ-
नृज्वोर्व्यस्तं भवति च यतोऽर्काद्विधुः सा शराग्रा ।

लग्नादल्पे निशि दिविचरे मार्दुयुक्तादनल्पे
दृग्या योगो निजदिनगतो लग्नमर्कान्न खेटात् ॥ ६ ॥
इ[illegible]ोह भास्करोदिते यहागमे कुतूहले ।
धि[illegible]धबुद्धिवल्लभे नभोगयोगसाधनम् ॥ ७ ॥

स्पष्टार्थे वासना च सर्वा सिद्धान्तोक्तैव ज्ञेया ।
श्रीकृपातनयेन निर्मिते वासनावरविभूषणे वरा ।
खेटयो[illegible]णितस्य वासना सूक्तियुक्तिसहिताऽत्र सङ्गता ॥
इति [illegible]णकुतूहलवासनाविभूषणे ग्रहयुत्यधिकारः ।

अथ पाताधिकारस्तत्रादाविति कर्त्तव्यतामाह ।

विधा सपातेन्दुमिहायनांशकैर्युतो रविः शीतकरश्च गृह्यते ।
समापमत्वे व्यतिपातवैधृताह्वयस्तदैक्ये रसभेऽर्कभे क्रमात् ॥ १ ॥
[illegible]स्तदूनाधिकलिप्तिकाभ्यो भुक्त्यैक्यलब्धेष्यगतेरहोभिः ।
[illegible]कालिको तौ च तमश्च कृत्वा प्राग्वत्प्रसाध्यो विशिखः कलादिः ॥२॥

स्पष्टार्थमिदम् ।

इदानीं पातस्य गतागतमाह ।

ओजे पदे युग्मपदे विधुश्चेदेकान्यगोलश्च सपातचन्द्रात् ।
[illegible]रस्तदानीं खलु यातपातो गम्योऽन्यथात्वे च ततोऽपि कालात् ॥ ३ ॥

स्पष्टार्थमेतत् ।

अत्रोपपत्तिः । ओजे यदि चन्द्रस्तदोत्तरोत्तरं क्रान्तिर्वर्द्धते सपातचन्द्रश्च सङ्गतिगेय ततः सा क्रान्तिः शरयुक्ता ततोऽपि महती तेन यातः पातः । युग्मे समे चन्द्रे क्रान्तिरपचीयते सपातचन्द्रस्य भिन्नगोलस्यत्वात् शरोना ततोऽप्यल्पा तस्मदापि यातः पातस्तत उपपन्नम् ।

इदानीं पातकालसाधनमाह ।

क्रान्[illegible]षखण्डानि धनं क्रमेण व्यस्तानि तान्यस्वमिति प्रकल्प्यम् ।
चन्द्[illegible]स्य पातेन्दुयुतेश्च भागास्तिथ्यद्भुताः स्युर्गतखण्डकानि ॥ ४ ॥
क्रमो[illegible]त्क्रमान्नूनना च कार्य्या चापाह्वयाः शेषलवा व्यतीते ।
गम्ये ऽथ पाते तिथितश्च्युतास्ते द्विधा द्विधा भोग्यदलादिकानि ॥ ५ ॥

द्विघ्नानि विन्यस्य पृथग्दलानि गतानि गम्येऽथ गते गतानि ।
एकस्थमेवास्य तु भोग्यखण्डं यस्याल्पकाश्चापलवा भवन्ति ॥ ६ ॥
विश्वांशकेनाप्तभोग्यकस्य भोग्यादितः क्रान्तिदलादिकानि ।
संस्कृत्य पूर्वं शरखण्डकैश्च स्युः संस्कृतानि क्रमशः स्फुटानि ॥ ७ ॥
आद्येऽल्पचापांशमितो गुणः स्याच्चापान्तरांशाः समखण्डकाः ।
तिथिच्युतास्ते विषमेषु जह्यात्स्वांशघ्नखण्डानि तिथिघ्नबाणात् ॥ ८ ॥
शेषं त्वशुद्धेन हृते लवाद्यं संशुद्धखण्डांशयुतं विभक्तम् ।
गत्या विधोः षष्टिगुणं गतेष्यैर्लब्धैर्दिनैः स्यात्खलु पातमध्यम् ॥ ९ ॥
अपक्रमस्य भोग्यकं यदेषुखण्डतश्च्युतम् ।
गतेष्यताविपर्ययात्तदाच्च पातसाधनम् ॥ १० ॥

सर्वं यथाक्रमेण स्पष्टम् ।
अत्रोपपत्तिः । यस्मिन्समये सायनरविशशियोगो भादौ वा चक्रं तः
समभेवस्पृक्क्रान्त्यन्तरं तत्र पञ्चदशभागवृद्ध्या चन्द्रस्य मध्यमक्रान्तिख
शरखण्डकैः संस्कृतानि स्पष्टक्रान्तिखण्डानि कृत्वा ततस्तत्
रविक्रान्तिखण्डकैः संस्कृत्य क्रान्त्यन्तरखण्डकानि कृतानि रविक्रान्ति

नयने यावच्चन्द्रगतिः पञ्चदशभागसमा भवेत् तावद्रविगतिः = $\frac{१५}{१५}$

नुपातो यदि पञ्चदशभागैर्भोग्यखण्डं तदा रविगतिभागैः किं लब्धं भोग्य
खण्डत्रयोदशांशसमं क्रान्तिखण्डं प्रथमं उत्तरोत्तरं शोधनादिना तत्रोणि
क्रान्तिखण्डानि त्रयोदशांशसमान्येव । अथानन्तरानीतशरसमं क्रान्त्यन्त
रमपचीयमानेन यदा शून्यं स्यात्तदैव क्रान्तिसाम्यस्य मध्यकालस्तत्र्यमिष्ट
कालात्स्वदेशोदयैर्लग्नसाधनवत् क्रान्त्यन्तरखण्डैर्गते पाते शेषांशैर्गम्ये शेषां
शोनपञ्चदशभिः क्रियोत्पाद्यते तदा यथा पञ्चदशांशैर्भोग्यखण्डं तदा शे
षांशैर्वा शेषोनपञ्चदशभिरथ वा चापाहतैः किं गते गम्ये वोभय शेषा
शसम्बन्धिक्रान्त्यन्तरगतिस्तत्स्वरूपं = $\frac{\text{भो}\cdot\text{ चा}}{१५}$ एतच्छरे शो ते ज्ञातं
= $\frac{१५\ \text{श}\cdot\ \text{भो}\cdot\ \text{चा}}{१५}$ ततोऽन्यानि खण्डानि समच्छेदविधिना पञ्चद गुणानि
विशोध्य शेषैरनुपातो यदि अशुद्धखण्डेन पञ्चदशांशास्तदा शेषपञ्चदशांशै

किं लब्धं शेषसम्बन्धिन अंशाः = $\frac{\text{शे}}{\text{अख}}$ ततो विशुद्धांशसंख्याभियुतो अंशा ये तैरनुपातः कालसाधनार्थं यदि चन्द्रगतिकलाभिः षष्टिघटिकास्तदांशकलाभिः किं लब्धः कालो गतेष्यः = $\frac{\text{अं} \times ६० \times ६०}{\text{च ग अं}}$ दिनार्थं षष्टिविभक्तेनोपपन्नं संस्कारे भोग्यखण्डानामृणत्वाद्विपरीता क्रियेत्यादीनां वासना सरला ।

इदानीं पातस्थित्यादिमाह ।

अशुद्धखण्डभाजिताः स्त्रियाश्विदस्रनाडिकाः ।
स्थितिश्च मध्यपूर्वतोऽयतोऽपि तत्प्रमाणिका ॥ ११ ॥
यदाखिलेषु खण्डकेष्विहाद्यखण्डजादिषु ।
च्युतेष्वपीषुशेषकं खनागसागराधिकम् ॥ १२ ॥
तदा न पातसम्भवो यदास्ति सम्भवस्तदा ।
विशुद्धखण्डभाजिते गतेष्यकालसाधनम् ॥ १३ ॥
तथा शरांशशेषकं खनागवेदतश्च्युतम् ।
नयग्रमन्त्यखण्डहृद्दलीकृतं स्थितिस्तदा ॥ १४ ॥
मानयोगखण्डतो यावदल्पमन्तरम् ।
क्रान्तिसाम्यमेव तत्तावदेव हि स्थितिः ॥ १५ ॥
इतीह भास्करोदिते महागमे कुतूहले ।
विदग्धबुद्धिवल्लभे महाद्विपातसाधनम् ॥ १६ ॥

स्पष्टार्थमिदम् ।

उपपत्तिः । तावत्समत्वमेव क्रान्त्योर्विवरं भवेद्यावदित्यादिना यदा मानैक्यार्धसमं क्रान्त्यन्तरं तदा स्पर्शो मुक्तिश्च तत्राचार्येण मध्यमं मानैक्यार्धं मध्यमा चन्द्रगतिश्च गृहीता ततोऽनुपातः अशुद्धखण्डेन पञ्चदशांशास्तदा मानयोगखण्डेन किं पुनश्चन्द्रगत्या षष्टिघटिकास्तदानीतांशकलाभिः किं जाताः स्थित्यर्धघटिकाः = $\frac{१५ \times ३२ \times ६० \times ६०}{\text{अख} \times \text{च ग}}$ अत्र यदि च ग = ९९० तदा स्थि

$= \frac{२१८१}{अ ख}$ अथ यदि चग = ६८० तदा स्थि = $\frac{२२१५}{अख}$ उभयोर्योगार्धे = $\frac{२२}{अ}$

आचार्येणेदं = $\frac{२२०१}{अ ख}$ गृहीतं स्वल्पान्तरात् । अथ यदा शेषमानं = $\frac{४८०}{१५}$ =

तदा मानैक्यार्द्धसमभन्तरं क्रान्तिसाम्यं केन्द्राभिप्रायेण न भवति अ
केऽपि न सम्भवो न्यूने तदैव मध्यस्ततः स्थित्यर्धानयनायानुपातः अन्त
खण्डेन पञ्चदशभागास्तदा $\frac{४८० - शे}{१५०}$ अनेन किं लब्धं $\frac{४८० - शे}{अख}$ ततो वि
गत्या षष्टिघटिकास्तदा लब्धांशकलाभिः किं जाता स्थितिः

$= \frac{(४८० - शे) ६० \times ६०}{अख \times ८००} = \frac{(४८० - शे) \times ३६}{अख \times ८} = \frac{(४८० - शे) \times ९}{अख \times २}$

अन्यत् सुगमं सर्वम् ।

श्रीकृपालुतनयेन निर्मिते वासनावरविभूषणे वरा ।
क्रान्तिसाम्यगणितस्य वासना सूक्तियुक्तिसहिताऽत्र सङ्गता ॥

इति करणकुतूहलवासनाविभूषणे पाताधिकारः ।

अथ पर्वसम्भवाधिकारस्तत्र शरादिकमाह ।

द्विघ्नो मासगणस्त्रिहृट्टिभयुतो वर्षाभ्रदग्नांशयुग्
वव्वोक्तार्कघटीफलं शरहृतं स्वर्णं च तस्मिन् लवाः ।
युक्ता मासमितैर्गृहैरथ रवे राश्यर्द्धयुक्ताश्च ते
तद्वाहोस्तु लवा निजार्द्धसहिताः स्यादङ्गुलाद्यः शरः ॥ १
दर्शान्ते नतनाडिकाङ्घ्रिरहितो युक्तो गृहाद्यो रविः
प्राक्पश्चादयनांशकैश्च सहितस्तद्वैर्गृहैर्नाहताः ।
शैलास्ते द्विगुणा लवादिरपमस्तत्स्वातितोंशा नता-
स्तद्वैदांशमिता नतिश्च विशिखस्तत्संस्कृतोऽर्कग्रहे ॥ २ ॥
गोचन्द्रा हिमगोर्भवाश्च तरणेर्मानैक्यखण्डं शरे
तन्न्यूने ग्रहणं भवेदिति बुधैश्चिन्त्यः पुरा सम्भवः ।
चक्राद्यः खलु मध्यमार्कतमसो योगो द्विनिघ्नो द्वियु-
र्पर्वेशो मुनिभक्तशेषकमितो ज्ञेयो विरञ्च्यादिकः ॥ ३ ॥

स्पष्टार्थमेतत् ।

अत्रोपपत्तिर्मासाः पृथक् ते द्विगुणाः स्वाङ्कनृपांशयुतास्त्रिभिर्विभक्ताः फलमंशपूर्वं मासोघतुल्यैश्च एहैर्युतमिति पर्वसम्भवाधिकारेणैव तत्र यन्यारम्भस्य पञ्चदशदिनस्य च पातयोर्योगेन क्षेपसंज्ञा कृता स्वल्पान्तरात् स्वाङ्कनृपांशफलं त्यक्तं तेन विंशतिवर्षे चैकांशसममन्तरं एवं मध्यमः सपातसूर्यो भवति तत्रार्केघटीफलं द्वादशगुणं कलास्तत् षष्टिभक्ता अंशास्तद्रूपं = $\frac{\text{घफ}\ १२}{६०}$

= $\frac{\text{घफ}}{५}$ अनया रीत्या पूर्णान्ते सपातसूर्यः स राश्यर्धसहितो दर्शान्ते सपातसूर्यः स्यात् तदंशा द्विगुणाः खार्कमिते व्यासार्धे जीवा ततः पूर्ववदङ्गुलाद्यः शरः = $\frac{२ \text{ज} \times \text{पशक}}{१२० \times ३} = \frac{२ \text{ल} \times २७०}{१२० \times ३} = \frac{३ \text{ल}}{२}$ अत उपपन्नः प्रथमश्लोकः ।

द्वितीयश्लोके अयनांशकैश्च सहित इत्यन्तं सुगमं स्वल्पान्तराद्दृश्यमलग्नस्य या विक्षिप्तस्य भानं तस्मात्क्रान्तिः श्रीपतिरीत्या भुजज्यया

क्रा = $\frac{(१८० - \text{भु})\ \text{भु} \times ४८० \times २४}{१२० \{४०५०० - (१८० - \text{भु})\ \text{भु}\}} = \frac{(१८० - \text{भु})\ \text{भु} \times ९६}{४०५०० - (१८० - \text{भु})\ \text{भु}}$

= $\frac{(९ - \frac{\text{भु}}{३०})\ \frac{\text{भु}}{३०} \times ९६}{४५ - (९ - \frac{\text{भु}}{३०})\ \frac{\text{भु}}{३०}} = \frac{(९ - \text{भुरा})\ \text{भुरा} \times २}{१ - \frac{(९ - \text{भुरा})\ \text{भुरा}}{४५}}$ स्वल्पान्तरात्, हरे वियोजकं प्रक्षिप्य छेदसमो एहीछस्तेन भाज्यस्थानेऽपि किञ्चिदधिकं कृतमर्थात् षट् स्थाने सप्तसंख्या कृता ततः क्रा = $\frac{(७ - \text{भुरा})\ \text{भुरा} \times २}{१}$ अथ क्रान्त्यवसंस्कारेण स्वल्पान्तराद्विक्षिप्तभानांशास्ते द्विगुणास्तज्जीवा ततः पूर्ववच्छरः

नात्मिका = $\frac{२ \text{न} \times \text{पनक}}{१२० \times ३} = \frac{२ \text{न} \times ४८}{१२० \times ३} = \frac{\text{न} \times ४}{५ \times ३} = \frac{\text{न}}{४}$ अनेनोपपन्नो द्वितीयश्लोकः । तृतीयस्य तु विक्षिप्तेन मध्यमभानेऽप्यखण्डेन प्रकटैव वासना ।

इदानीं ग्रन्थसमाप्तौ स्वस्त्यादिमाह

आसीत्सज्जनधाम्नि विज्जडविडे शाण्डिल्यगोत्रोद्भवः
श्रौतस्मार्त्तविचारसारकुशलः सोऽज्ञन्यरत्नाकरः ।
ज्यातिर्विन्तिलको महेश्वर इति ख्यातः क्षितौ स्वेर्गुणै-
स्तत्सूनुः करणं कुतूहलमिदं चक्रे कविर्भास्करः ॥ ४ ॥

इतीह भास्करोदिते ग्रहागमे कुतूहले ।
विदग्धबुद्धिवल्लभे रवीन्दुपर्वसम्भवः ॥ ५ ॥

स्पष्टम् ।

श्रीकृपालुतनयेन निर्मिते वासनावरविभूषणे वरा ।
पर्वसम्भवविधानवासना सूक्तियुक्तिसहिताऽत्र सङ्गता ॥

सुवासनाविभूषणं सरस्वतीसुखप्रदम् ।
सुधाकरेण निर्मितं सदा पठन्तु सज्जनाः ॥

रामप्रसादजननूनसुधाकरेण श्रीभास्करीयकरणस्य कुतूहलस्य ।
चक्रे विभूषणमिदं विदुषां मुदर्थं यद्धारणेन सरसा च सरस्वती स्यात् ॥

इति करणकुतूहलवासनाविभूषणे पर्वसम्भवाधिकारः ॥

आश्विनशुक्लपक्षां शके ऽधिकाष्टादशशततमे पूर्णमिदं जगदीशानुग्रहेण

॥ इति ॥

अत्र वासनोपयोगीनि वृत्तानि प्रायो भास्करीयसिद्धान्तशिरोमणेरेव

25269